A First EPQRST Journal-www.jahnavisanskritejournal.com, Issue-17th, Vol.-V, 14.1.14

ISSN 976-8645

# मानमनोहरप्रतिपादित-प्रत्यक्षप्रमाणपरीक्षा

मनीषकुमारझा

कूटशब्दाः प्रत्यक्षम्, अनुमानम्, सन्निकर्षः, प्रत्यक्षभेदाः

षड्विधास्तिकभारतीयदर्शनसम्प्रदायेषु प्राचीनतमं सर्वशास्त्रोपकारकं महर्षिकणाद प्रणीतञ्च दर्शनमस्ति वैशेषिकदर्शनम्। सोऽयं दर्शनप्रविभागः विशेषनामाभिनवपदार्थाङ्गीकारा द्विशिष्य तत्प्रदिपादनाच्च वैशेषिकाभिधानेनान्वर्थताम्भजते। तदिदं दर्शनं जैनबौद्धदर्शनशाखा न्तिकमिति धिया भारतीयदार्शनिकविद्वज्जननयनपथोपेक्षितं वचसा प्रचयालोचितम्भर्त्सितञ्च। तस्मात्तार्किकाणामत्यल्पानुरागः अल्पीयसी एव श्रद्धा वैशेषिकदर्शनम्प्रति वर्तत इति वैशेषिकदर्शनोपलब्धसाहित्यमालक्ष्य तत्र तेषामायासपरीक्षया च सारल्येनावगन्तुं शक्यते । माधवाचार्यप्रणीतसर्वदर्शनसङ्ग्रहे वैशेषिकस्य कृते औलुक्यशब्दव्यवहारः सप्तपदार्थीग्रन्थस्य कलापव्याख्यायां धर्मं व्याख्यातुकामस्य षद्पदार्थोपवर्णनमित्यादिना वचसा अपि च भगवत्पादशङ्कराचार्यस्य शारीरकभाष्यस्था कटाक्षपूर्णोक्तिः भारतीयदार्शनिकमनीषिषु वैशेषिकदर्शनम्प्रति प्रीत्यभावस्य प्रभूतावकाशं प्रकल्पयति। तस्मात् यादृशः ज्ञानपरम्पराविच्छेदः वैशेषिकदर्शननिकाय उपलभ्यते न तथा कुत्रचिदन्यत्रावाप्तुं शक्यत इति। नायं विरागः तात्कालीनकः अद्यापि ईषदेवग्रन्थाः प्राप्यन्ते वैशेषिकस्य । इदानीमपि बहवः अप्रकाशिताः सन्ति वैशेषिकग्रन्थाः, प्रकाशिताः सन्तोऽपि बहवः अध्ययनार्थं पाद्यक्रमादिषु नोपयुज्यन्ते। अस्यामेवानधीयमानग्रन्थशृङ्खलायामन्यतमोऽस्ति मानमनोहरः। यत्र वैशेषिकम्प्रति मानवार्ता विहीनमित्याक्षेपस्य निराकरणम् अथ नव्यन्यायशैल्यां पुष्कलानुमानगर्भितवाक्यद्वारा प्रत्यक्षनिरूपणम् , विविधमतखण्डनपूर्वकनिर्विकल्पकज्ञानस्यापि प्रत्यक्षत्वानुसन्धानं पुनश्च कीदृशनिर्विकल्पकस्य प्रत्यक्षत्वविचारः, संयोगसमवायावेव लौकिकसन्निकर्षौ नान्यः इति पक्षस्यैवात्र स्वीकृतिश्चेत्यादीनि तथ्यानि समुचिततया विवेचितानि सन्ति ।

ISSN 976-8645

आचार्यवादिवागीश्वरकृत: मानमनोहर: वैशेषिकदर्शनस्य कश्चन महत्त्वाधायक: दुरूहश्च प्राचीनग्रन्थोऽस्ति। चित्सुखाचार्यव्याख्यायितन्यायप्रसादनी-माधवाचार्यकृतसर्वदर्शनसङ्ग्रह-आनन्दबोधभट्टारकविरचितन्यायमकरन्द-श्रीविमुक्तात्माविरचित-इष्टसिद्धयादिग्रन्थव्याख्यानमाधारीकृत्य अयमाचार्य: द्वादशशतकान्तवर्ती शाक्तशैवधर्मावलम्बी चेति प्रमाणीक्रियते। तस्मान्मानमनोहरग्रन्थस्य आनुमानिकसमय: वर्तते द्वादशशताब्दीति। वैशेषिकदर्शनक्षेत्रमुपादाय भृशं कर्मव्याहर्त्रा सामयिकविद्वद्वरेण श्रीमदनन्तलालठक्कुरेण वैशेषिकसूत्रव्याख्यावृत्तिभूमिकायां नैजमतमुपवर्णयता निश्चायितं यन्मानमनोहर-कर्त्ता मूलत: दाक्षिणात्य: तत्रापि कर्णाटप्रदेशीय: द्वादशशताब्द्यन्तवर्ती च।

**ग्रन्थस्य नामकरणम्—**वैशिषकदर्शनमुद्दिश्य इतरसम्प्रदायानामाक्षेपान् सङ्गृह्य एवं प्रत्यपादि श्रीमदुदयनाचार्येण किरणावलीग्रन्थे –

**अतिविरसमसारं मानवार्तावि‍हीनं प्रविततबहुबेलप्रक्रियाजालदु:स्थम्।**
**उदधिसममतन्त्रं तन्त्रमेतद् वदन्ति प्रखलजडधियो ये तेऽनुकम्प्यन्त एते॥**

एतेन स्पष्टमिदमायाति यत् ''**मानवार्ताविहीनम्**'' इत्याक्षेपमालोच्यैव पूर्ववादिनां सन्देहं समापयितुं जग्रन्थ मानमनोहरम्। **मानमनोहर इतिश्रुत्यैव ''मानैर्मनोहर: अथवा मानानि मनोहराणि यत्र अथवा मानेन अभिमानेन गर्वेण वा पूर्णं मनो मानमन: तस्य हरो हर्ता दमयिता''** इत्याद्यर्थावगतिर्भवति। अत्र अन्तिमार्थस्तु ''**प्रतिवादिगर्वप्रशान्तये**'' इति मङ्गलवादांशेन प्रस्फुटितो भवति।

**ग्रन्थस्य वैशिष्यम्—**अस्य ग्रन्थस्य महत्वास्पदवैशिष्ट्यमिदं वर्तते यदस्मिन् ग्रन्थे सर्वमपि प्रतिपाद्यं प्रायश: पुष्कलानुमानगर्भितवाक्यद्वारैव प्रतिपादितमस्ति। तस्मादनुपदमेव वरीवर्ति वरीभर्ति अनुमानवाक्यप्रयोग: समग्रेऽपि ग्रन्थे। अयं ग्रन्थ: दशप्रकरणान्वित:। तत्र तृतीयभूते गुणप्रकरण एव मानमीमांसा प्राप्यते। यद्यपि प्रशस्तपादविरचितपदार्थधर्मसङ्ग्रहमेवानुसरति मानप्रधान: स्वतन्त्रवैशेषिक-दर्शनग्रन्थोऽयं तथापि बहुत्र स्थले उभयोर्भूयान्भेदोऽपि दृग्गोचरो भवति। उदाहरणरूपेण ''**अवयवा: पुन: प्रतिज्ञापदेशनिदर्शनानुसन्धानप्रत्याम्नाय:**'' इति भाष्यकारवचसा तन्मते पञ्चावयवा स्वीकृतास्त-त्रैव मानमनोहरे ''**अङ्गे च द्वे एव व्याप्तिपक्षधर्मत्वे**'' इत्युदीर्य अवयवद्वयमेव अङ्गीकृतास्ते इति दिक्। ईदृगुपकारी ग्रन्थोऽयमस्माकमध्ययनपरम्परायां कुत्रचिदपि विश्वविद्यालयादिषु पाठ्यक्रमे निर्धारितो नास्ति तस्मात् कालक्रमेण ह्रासतामधिगच्छताम् ईदृक्पारम्परिकग्रन्थानां संरक्षणमस्माकीनं आवश्यकङ्कर्तव्यमिति विभाव्य अमुङ्ग्रन्थमेवाधिकृत्य अस्य प्रमाणविषयपरीक्षणमिह प्रस्तूयते।

अत्र सर्वप्रथमं प्रकरणादौ प्रत्यक्षं निरूपयितुम्प्रवृत्त: ग्रन्थकार: अनुमानवाक्यमाश्रयति तथा चानुमानवाक्यं-''चक्षुश्चक्षुर्जन्यसविकल्पकव्यतिरिक्तज्ञानजनकम्, इन्द्रियत्वात् मनोवत्''। अत्रेदं रहस्यं यन्मानमनोहरग्रन्थप्रणयनसमये केचन प्रमुखप्रतिवादिन: ये निर्विकल्पज्ञानप्रत्यक्षमिति न मन्वते स्म,

A First EPQRST Journal-www.jahnavisanskritejournal.com, Issue-17th, Vol.-V, 14.1.14

ISSN 976-8645

न्यायवैशेषिके तु निर्विकल्पमपि प्रत्यक्षमेवेति मन्यते तस्मात् निर्विकल्पकज्ञानस्यापि प्रत्यक्षत्वं संसाधयितुं प्रवर्त्यते चक्षुरित्यादिना। अत्र चक्षुः पक्षः, तज्जन्यसविकल्पकज्ञानातिरिक्तज्ञानजनकत्वं साध्यम्, इन्द्रियत्वं हेतुः, मनः दृष्टान्तम्। यथा मनः मानसप्रत्यक्षहेतुरिन्द्रियत्वात् तद्वत् चक्षुरपि सविकल्पकज्ञाना-तिरिक्तज्ञानजनकम् अर्थात् निर्विकल्पकज्ञानजनकमिन्द्रियत्वादिति फलितम्,न च सविकल्पकातिरिक्तं मानसप्रत्यक्षमेवेह साध्यत्वेन ग्राह्यमिति वाच्यम्, चक्षुषः सत्यपि इन्द्रियत्वे मानसप्रत्यक्षरूपसाध्यस्या-सत्त्वात् ''साध्याभाववान् हेतुर्विरूद्धः'' इति दोषापत्तिर्दुर्वारा, तस्मात् मनसो दृष्टान्तत्वेन उपादानमुपयुक्त-मेव ।अतः यथा चक्षुः सविकल्पकज्ञानोपकारकं तद्वन्निर्विकल्पकज्ञानस्यापि । न च सविकल्पकनि-र्विकल्पभेदविवादेन आहोस्विद् दूरस्थ–विप्रकृष्ट–अतीतानागतसूक्ष्मादिस्थले प्रत्यक्षपदं विवादितमिति वाच्यं वस्तुत्वात् प्रमेयत्वाद्वा घटवत्। अर्थात् सर्वमपि वस्तु संशयग्रस्तं वस्तुत्वात् यथा घटः इत्यनुमानद्वारा प्रत्यक्षमपि केषाञ्चन मतानुसारेण केवलं सविकल्पकं तत्रैव अन्येषाम्मते निर्वकल्पमिति एकस्य एव प्रत्यक्षस्य द्विधाभेदस्वीकारात् विप्रतिपत्त्या विवादग्रस्तमिति। विप्रतिपत्तिर्नाम विचारांशसन्देहः। अत्र कारणं इन्द्रियार्थसम्बन्धात्मकस्य प्रत्यक्षसामग्र्या निर्विकल्पप्रत्यक्षवेलायामसत्वात् तस्योपाधित्वाच्च इति वाच्यम् ।अत्रेदं वक्तव्यं यद् विरोधिमतानुगुणं योऽयं प्रत्यक्षसामग्र्यसद्भावः तस्यैव नाम साधनतेति। ''पर्वतो धूमवान् वह्नेः'' बाधितहेत्वाभासस्थले यथा आर्द्रेन्धनसंयोगः अनुमितिप्रतिबन्धकः तद्वत् आद्रेन्धनसंयोग एव धूमजनकः तस्मात् प्रत्यक्षसामग्र्यद्भावोऽपि न निर्विकल्पकज्ञानप्रतिबन्धकः किन्तु हेतुरेव। न च बाधित्वत्वात् इत्यादिहेतुत्रयेण एतदनुपपन्नमिति वाच्यम्। अयम्भावः प्रत्यक्षसामग्रीविर-हस्थलेऽपि यदि अनुमितिर्मन्यते चेत् कारणभावेऽपि कार्यस्य जननात् व्यतिरेकदोषग्रस्तत्वादनुपपन्नं स्यात् प्रत्यक्षम्। अतः प्रथमो हेतुः बाधितत्वात् अर्थात् प्रत्यक्षसामग्र्यसद्भावस्थले प्रत्यक्षस्यासम्भवात् बाधितम्प्रत्यक्षम्, द्वितीयो हेतुः बाह्येन्द्रियासम्बद्धविषयत्वात् अस्येदं तात्पर्यमस्ति यत् प्रत्यक्षसामग्री-कदम्बाभावे बाह्येन्द्रियसद्भावस्तु अस्त्येव। न च मानसिकप्रत्यक्षं स्यात् मनसः बाह्यार्थग्रहणेऽस्वातन्त्र्यात्। स्वातन्त्र्यं नाम साक्षान्नियामकत्वम् ।तच्च इन्द्रियादिषु एव तिष्ठति। साक्षान्नियामकत्वं यस्मात्साक्षादनन्तरं ज्ञानोत्पत्तिः। मनसस्तु पारम्परिकहेतुत्वम्, तस्य पारतन्त्र्यात्। यथा हि ज्ञानप्रक्रिया–आत्मा मनसा युज्यते मनः इन्द्रियेण इन्द्रियमर्थेन तत एव प्रत्यक्षादिकम्। अत एव कथ्यते ''परतन्त्रं बहिर्मनः''। अन्यथा अर्थात् मनसः एव स्वातन्त्र्येण कारणत्वं स्यात्तदा अन्धादिष्वपि रूपग्राहकता प्रसक्तिस्स्यात्। अत्रायं समाधिः यदेतत्सत्यं यदतिप्रसङ्गः बाधकः तथापि नियामकप्रमाणोपलब्ध्या प्रकृतार्थसाधकोऽपि भवति। यथा आत्मा वाऽऽरे द्रष्टव्यः श्रोतव्यः मन्तव्यः इत्यादि प्रमाणभूतवाक्यजन्यः योगजधर्मः प्रत्यक्षसामग्र्यभावेऽपि उत सत्यपि दूरस्थसूक्ष्मादिवस्तूनां प्रत्यक्षसाधकः तस्य सर्वदर्शितत्वादिति। तस्मात् यौगिकप्रत्यक्षस्य कृते दूरसूक्ष्मादिकं न किमपि प्रतिबन्धकम्भवति। अयञ्च यौगिकधर्मः समाधिद्वारा प्रापणीयः। तस्मात् ऋष्यादीनामपि प्रत्यक्षम्भूतं यज्ज्ञानं तदपि योगादिजन्यधर्मादिवशादेव।

ISSN 976-8645

अत एव उक्तं सूत्रकृता–''**आर्षं सिद्धदर्शनं च धर्मेभ्यः**''। अत एव योगवतां विशिष्टकुले उत्पन्नस्य जनस्यापि स्वरूपयोग्यतायाः सत्यपि फलभूतन्तत्त्वज्ञानं स्वार्जितयोगजधर्ममनन्तरेण न सम्भवति। अत एव ''जायां प्रति ग्राहीतगन्धमाल्यमिति'' कालीदासीयोक्तिरपि सङ्गच्छते। किञ्च ''शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते'' इति गीतास्था भगवदुक्तिरप्यत्र प्रमाणम्।

कथमस्मदादीनां लौकिकानाम्प्रत्यक्षमिति प्रसृते सन्देहे समादधति–''अस्मादिज्ञानोत्पत्यर्थमिन्द्रियमर्थेन संयोगसमवायावपेक्ष्य यथायोगं करोति''। अयम्भावः चक्षुरादीन्द्रियादिभिः तत्तदर्थेन सह संयोगादिसम्बन्धेन जायमानज्ञानमेव प्रत्यक्षम्। स च सन्निकर्षः षड्विधः इति वर्णनं प्रथमतया उद्योतकरस्य न्यायवार्तिके प्राप्यते। किन्तु मानमनोहरकृत् संयोगसमवायसम्बन्धा एव वर्णयामास। अन्ये तु संयुक्तसमवायादयः संयोगसमवायव्यतिरेकिणः न केचन नूतनसंसर्गाः। अन्यथा तेषां पृथक्–पृथकतया स्वीकारे ग्रन्थपञ्चस्स्यात् यथोच्यते मूले ''**संयुक्तसमवायस्तु न संयोगसमवायव्यतिरेकिणः अन्यः अस्ति**''। इदञ्च इद्रियार्थसम्बन्धद्वारार्जितं यल्लौकिकज्ञानं तदनित्यं यथार्थायथार्थञ्च । नित्यं यथार्थम् अपरोक्षं च ज्ञानन्त्वीश्वरमात्रस्यैव । तस्मादिन्द्रियार्थसन्निकर्षेण जायमानं प्रत्यक्षमिति लक्षणं नित्यज्ञानवति ईश्वरेऽव्याप्तमिति विभाव्य ''**ज्ञानाकरणकज्ञानं प्रत्यक्षमिति**'' लक्षणान्तरमपि प्रत्यक्षस्य प्रत्यक्षनिरूपणावसरे न्यायसिद्धान्तमुक्तावल्यादिग्रन्थे स्वीकृतम् ।

एतावता आचार्यवादिवागीश्वरोऽपि निर्वविकल्पस्य प्रत्यक्षत्वमाविष्करोति तच्च प्रत्यक्षं योगजमित्यन्यदेतत्। वस्तुतस्तु भासर्वज्ञेन न्यायसारे इतरप्रमाणमूलेन ज्येष्ठत्वात् प्रथमोद्दिष्टं प्रत्यक्षमित्थम्परिभाषितम्–''तत्र सम्यगपरोक्षानुभवसाधनं प्रत्यक्षम्'' तदनु तद्भेदमाह–तद्विविधं योगिप्रत्यक्षमयोगिजप्रत्यक्षमिति चेति । अत्र चकारग्रहणं निर्विकल्पकसविकल्पकभेदानपि वक्ष्यमाणं द्वैविध्यं समुच्चिनोति। तस्मात् योग्ययोगिप्रत्यक्षभेदेन निर्विकल्पकसविकल्पकभेदेन वा द्विविधं प्रत्यक्षम्। तत्रायोगिप्रत्यक्षं ''प्रकाशदेशकालधर्माद्यनुग्राह्यादिन्द्रियार्थसम्बन्धविशेषेण स्थूलार्थग्राहकम्''। ''**योगिप्रत्यक्षं तु देशकालस्वभावविप्रकृष्टार्थग्राहकम्**''। सविकल्पकनिर्विकल्पकभेदेन प्रत्यक्षं पुनरपि द्विविधं।

तत्र सञ्ज्ञादिसम्बन्धोल्लेखेन ज्ञानोत्पत्तिनिमित्तं सविकल्पकम्। ''**वस्तुमात्रावभासकम् निर्विकल्पकम्**''। अत्रैव वैशेषिकसूत्रोपस्कर्त्ता आह–ज्ञानं द्विविधं विद्या चाविद्या च। अदुष्टं विद्या इति सूत्रकारः॥ सा चतुर्विधा प्रत्यक्षलैङ्गिकस्मृत्यार्षलक्षणा। इन्द्रियजमपि द्विविधं सर्वज्ञीयमसर्वज्ञीयञ्च। सर्वज्ञीयं–योगजधर्मलक्षणया प्रत्यासत्या तत्तत्पदार्थसार्थज्ञानम् असर्वज्ञीयञ्च प्रत्यक्षं द्विविधं– सविकल्पकं निर्विकल्पकञ्च । भाष्यकृत्तु विद्या चतुर्विधेति। प्रत्यक्षलैङ्गिकस्मृत्यार्षलक्षणा। तत्राक्षमक्षं प्रतीत्योत्पद्यते इति प्रत्यक्षम्। सूत्रकारेण प्रत्यक्षादीनां लक्षणमित्थमकारि–आत्मेन्द्रियसन्निकर्षाद् सन्निकर्षाद् यन्निष्पद्यते तदन्यत् , अस्येदं कार्यं कारणं संयोगि विरोधि समवायि चेति लैङ्गिकम्, आत्मनः संयोगविशेषात् संस्काराच्च स्मृतिः ''**आर्षं सिद्धदर्शनं च धर्मेभ्यः**''। पदार्थधर्मसङ्ग्रहे प्रत्यक्षज्ञानस्य

ISSN 976-8645

द्विधाभेदमङ्गीचकार योगजलौकिकभेदात्। पुनरपि प्रकारन्तरेण प्रत्यक्षं निर्विकल्पसविकल्पप्रकारेण द्विविधमित्यभ्युपगतं, तत्र निर्विकल्पकं प्रत्यक्षसामर्ग्यसद्भावेऽपि यौगिकप्रत्यक्षम्। अस्मदादीनां लौकिकानां योगजनितधर्मगम्यसामर्थ्याभावात् सविकल्पकप्रत्यक्षमेव इत्यादि प्रपञ्चितम्। अयमेव ग्रन्थः मानमनोहरकृदापि उत्कृष्टानुमानशैल्या समर्थितः। स एव प्रमाभेदः मानमनोहरकाराभिप्रेतः तस्मात् मानमपि चतुर्विधं प्रत्यक्षानुमानस्मृत्यार्षज्ञानरूपम् इति। अतः निर्विकल्पज्ञानमपि प्रत्यक्षस्यैव प्रकारः इति पर्यवस्यति किन्तु तत्र लौकिकप्रत्यक्षमपितु यौगिकप्रत्यक्षगम्यमिति अन्या कथा।

## अन्तटिप्पणी

1. सप्तपदार्थीग्रन्थस्य कलापव्याख्यायाम्।
2. तदेवमसारतरतर्क सन्दृब्धत्वादीश्वरकारणश्रुतिविरुद्धत्वाच्छ्रुतिप्रणवैश्च शिष्टैर्मन्वादिभिरपरिगृहीतत्वादत्यन्तमेवानपेक्षाऽस्मिन् परमाणुवादे कार्या। शारीरकभाष्यम्-२/१/१७
3. ''वादिवागीश्वरस्तु दाक्षिणात्यप्रसिद्धः खिष्ट्रियाष्टमाद् द्वादशशतकान्वर्तीति (वैशेषिकसूत्रवृत्तिभूमिका पृष्ठसंख्या-१६)
4. किरणावली, पृष्ठसंख्या-७
5. मानमनोहरस्य भूमिकायाम्-पृष्ठसंख्या-८
6. प्रशस्तपादभाष्यम्, पृष्ठसंख्या-११४
7. मानमनोहरपृष्ठसंख्या-85
8. रघुवंशम्, द्वितीयसर्गः ल्लोकसंख्या-१
9. भगवद्गीता-६/११
10. न्यायसारः-पृष्ठसंख्या-०९
11. न्यायसारः-पृष्ठसंख्या-१०
12. न्यासारः-पृष्ठसंख्या १६
13. न्यायसारः पृष्ठसंख्या-१९
14. न्यायसारः-पृष्ठसंख्या २०
15. वैशेषिकसूत्रम्-३/१/१८
16. वैशेषिकसूत्रम्-९/२/१
17. वैशेषिकसूत्रम्-९/२/६
18. वैशेषिकसूत्रम्-९/२/१३

ISSN 976-8645

# सन्दर्भग्रन्थसूची


1. आचार्यवादिवागीश्वरप्रणीत: ''मानमनोहर:'' भुवनेश्वरीहिन्दीव्याख्यया सनाथीकृत:, व्याख्याकार: ।
2. स्वामीयोगीन्द्रानन्द:,षड्दर्शनप्रकाशनप्रतिष्ठानम्,वाराणसी,प्रथमसंस्करणम्-1973
3. श्रीमन्महर्षिप्रशस्तदेवाचार्यविरचितं
4. ''प्रशस्तपादभाष्यम्'''प्रकाशिका'' हन्दीव्याख्याविभूषितम्, चौखम्भा संस्कृतसंस्थानम्, वाराणसी, संस्करण: द्वितीय,वि. स.-2037
5. उदयनाचार्यविरचिता''करणावली'', वर्धमानोपाध्यायविरचितकिरणावलीप्रकाशविभूषिता, सम्पादक:-महामहोपाध्यायशिवचन्द्रसार्वभौम:,प्रकाशक:-Asiatic Society of Bengal, New Series No.-1342. Park Street, Calcutta-1912.
6. ''न्यायदर्शनम्'',न्यायभाष्यसहितं ढुण्ढिराजशास्त्रिव्याख्यासमन्वितञ्च), अक्षपाद:, चौखम्भासंस्कृतभवनम्, वाराणसी, 2007
7. Datta and Chatterjee, "An Introduction to Indian Philosophy, University of Calcuta, First Edition-1939
8. श्रीभाससर्वज्ञप्रणीत: ''न्यायसार:'' वासुदेवसूरिकृतन्यायसारपदपञ्जिकाख्यव्याख्योपेत: पौरस्त्यग्रन्थप्रकाशनकार्याध्यक्ष-केसाम्बशिवशास्त्रिणा संशोधित:, महामहिमश्रीसेतुक्ष्मीमहारा ज्ञाशासनेन राजकीयमुद्रणयन्त्रालये तदध्यक्षेण मुद्रयित्वा प्रकाशित:, कोलम्बादा:1106, कैस्ताब्दा:-1931
9. महर्षिगौतमविरचितं''न्यायसूत्रम् (भाग:-8), सम्पादक:- मेजर बी.डी.बसु:, प्रकाशक:- पाणिनिकार्यालय:, भुवनेश्वरी-आश्रम:, बहादुरगंज:, इलाहाबाद:,1913
10. महर्षिकणादप्रणीतं ''वैशेषिकसूत्रम्'' चन्द्रानन्दवृत्त्या समलङ्कृतम्, सम्पा.-Muni Shri Jambuvijayaji, Oreantal Institute, Baroda, 1961
11. माधवाचात्यप्रणीत:, ''सर्वदर्शनसङ्ग्रह:'' व्याख्याकार: उमाशङ्करशर्मा ऋषि:, चौखम्बाविद्याभवनवाराणसी, संस्करण-2010.